**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 2
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# आध्यात्मिकचिन्तने समाजवादः भारतीयज्ञानपरम्परासन्दर्भे

**प्रो. के. भरतभूषणः**
शिक्षापीठम्, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

**Article Info**
Accepted : 01 April 2025
Published : 12 April 2025
**Publication Issue :**
March-April-2025
Volume 8, Issue 2
**Page Number :** 139-143

शोधसारांशः – आध्यात्मिकचेतनायाः कारणेन सुसंस्कारस्य प्राप्तिः सामाजिकजीवने एकतायाश्च प्रभावः जायते। प्रत्येकस्मिन् मनुष्ये विद्यमानभगवत्तत्त्वस्य अवगमनम् एवं सर्वे सर्वेषां कृते इति भावनायाः जागरणं भवति। आध्यात्मिकसमाजवादः आत्मचैतन्यस्य (हृदयान्ते) मानवजातेः समष्टिजीवनमेव। तदेव परमकल्याणमय जीवनं भवति।

**मुख्य शब्द– समाजवादः**, पुण्यभूमिः, **आध्यात्मिकचिन्तनम्**, योगसिद्धिः, जगद्गुरुः।

भारतीयज्ञानपरम्परायां संख्याक्रमे सप्त-संख्यायाः (7) महत्प्रामुख्यं दत्तमस्ति। वेदेषु लोकानां गणना क्रियते।[1]ॐ भूःभुवः स्वः, महः, जनः, तपः सत्यमिति। सप्तलोकानां प्रतीकात्मकरूपेण सप्तनद्यः तथा सप्तसिन्धूः इति अनुभवामः। भारतदेशः सत्यदर्शिणां पुण्यभूमिः विद्यते। धर्मशक्तेः निधिः विद्यते। धर्मशक्तिरेव दुःखात्, दैन्यात्छाया-मायातः मनुष्यान् निवारयति। अतः पृथिव्यामेव स्वर्गमिव सुख, समृद्धिश्च सौन्दर्यानां तीर्थस्थानमिव गण्यते। देशस्य उन्नयनाय श्रद्धया भक्तया सेवाभावनया च ये जीवन्ति ते आत्मनो भाग्यशालिनः भारतीयाः मन्यन्ते। एकतायाः आधारेणैव देशस्य भाविगौरवस्य रहस्यं निहितमस्ति। आध्यात्मिकज्ञानशक्त्याधारेण देशस्य वास्तविकशक्तेः अनुभूतिः भवति। वेदाः, उपनिषदः श्रीमद्भगवद्गीता, रामायणम्, श्रीमद्भागवतम्, महाभारतम्, योगसिद्धिः एवं ऋषीणां, मुनीनां, साधूनां भजनं, नामसङ्कीर्तनादि सर्वं सहानुभूतेः अन्तर्ज्ञानस्य च दुर्लभ निधयः विद्यन्ते। ये च अद्य मानवजातेः अतीव सारल्येन सरलरूपेण सर्वेषां विभिन्नप्रकारेण (ग्रन्थेयन्त्रे वा) उपलभ्यन्ते, अनुभूयन्ते च।

वैज्ञानिकसंस्कृतिक्षेत्रेऽपि भारतीयाः प्रसिद्धाः आसन्। तदा तादृशवैज्ञानिकचिन्तनस्य, व्यवहारः पर्याप्तमात्रायामासीत्। अद्य परिणामरूपेण भिन्नरूपेण च आवश्यकमपि विद्यते, अन्वेषणमपि कुर्वन्ति। संगीते, चित्रकला, मूर्तिनिर्माणकला, वास्तुशास्त्रं, वैद्यकशास्त्रम्, अस्त्रविद्या, फलितज्योतिषम् इत्यादि क्षेत्रे भारतीयाः अग्रगण्याः आसन्। जगद्गुरुःइति शब्दस्य प्रतीतिम् अत्र अनुभवामः। आश्चर्येण विदेशेष्वपिजनाः आकृष्टाः तदा अध्ययनाय च अत्रागताः प्रभाविताश्च अभवन्। कालक्रमेण भिन्नसन्दर्भे मध्ये कतिपयकालः (शत) अन्यशक्यापीडितः अभवत्। भारतवर्षस्य आध्यात्मिकचिन्तने अवरोधः

[1].तै. आ. प्र.– 10–अ–27

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

जातः। नानाधर्मानुयायिनाम् (अत्र) आक्रमणेन समाजे दुर्बलतायाः अनुभवः आसीत्। कतिपयराजानः यद्यपि मध्येमध्ये भारतदेशस्य प्रतिष्ठां संस्थापयितुं प्रवृत्ताः परन्तुकदाचित् कारणान्तरेण दुर्बलाः अभवन्। (इतिहास एव प्रमाणम्)।

कालक्रमेऽस्मिन् प्रबुद्धराजनीतिज्ञः परिस्थितिं शान्त्या अवलोक्य अवगच्छन्। नूतनशक्तियुक्तस्य राज्यस्य (देशस्य) निर्माणे आचार्यचाणक्यस्य वर्णनातीतयोगदानमस्ति। प्रसिद्धस्यअर्थशास्त्रस्य निर्माणेन सामाजिक-धर्म-नियमानुसारं प्रबन्धने, व्यावस्थापने (देशस्यपुनः संगठने) आत्मानं समर्पितवान्। स्वीये न चाणक्यनीतिद्वारा देशे जनानां मध्ये देशभक्तेः पुनः स्मरणार्थम् अभिप्रेरकः आसीत्। चन्द्रगुप्तसाम्राज्यस्य निर्माणे मुख्यपृष्ठभूमिः आचार्यचाणक्यस्यैव इति इतिहासेन अवगम्यते। भारतवर्षस्य पुनर्निर्माणसन्दर्भे आचार्यचाणक्यस्य स्थानं स्वर्णलिप्यामेव लिख्यते। उत्तरभारतापेक्षया दक्षिणभारते तादृशः प्रभावः(आक्रमणात्) न जातः। देक्षिणेचेर-चोल-पाण्ड्य-पल्लवराजवंशा प्रसिद्धिरासीत्। आक्रमणकारणात्आध्यात्मिकचिन्तनस्य न्यूनवेलायां (सन्दर्भे) दक्षिणे शङ्कराचार्यः, रामानुजाचार्यः, मध्वाचार्यः चादिनां काले आध्यात्मिकज्ञानेन भक्तिप्रदीपस्य प्रज्ज्वलनं कृतम्। यद्यपि तेषु व्यक्तिशः सिद्धान्ताऽधारेण भेदः विद्यते अथाऽपि सर्वेषाम् ईश्वरप्राप्तिरेव लक्ष्यमासीत्।

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्॥
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत॥1॥
कुतस्तु खलु सोम्यैव स्यादिति होवाच कथमसतः सज्जायेतेति॥
सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्॥2॥ छान्दोग्योपनिषत् 6.2.1

तेषां हृदये समस्तानां प्राणिनामन्ते विशुद्धात्मानः तदेव प्राणिनां सत्तत्त्वं दिव्यं सर्वव्यापकञ्चेति। क्रमेण अनन्तरकालेऽपि आचार्याः अनुसरणं कृतवन्तः।

मध्यकाले अनुभूतकाठिन्यानां कारणात् स्वधर्मानुष्ठाने काठिन्यमासीत्। अत्रत्यराजानः राणाप्रतापः, शिवाजी, गुरुगोविन्दसिहःचेत्यादिभि द्वारा स्वाधीनतायाः प्रतिष्ठापनायमहदुपकृतम्। भारतदेशस्य आत्मा न सुप्तःतस्यै परिणामेन स्वाधीनदेशः अभवत् ते एवयद्यपिकतिपयानांसमस्यानां काठिन्यानां समाधानाय प्रवृत्ताः, परन्तु आध्यात्मिकचिन्तनस्य साधनारूपेण जीवनं संस्थापितवन्तः। क्षणं चिन्तनीयमस्ति यत् पृथ्वी किमिति? आकाशेअसंख्यारूपेण नक्षत्राणि एवं ग्रहाः निरन्तरं भ्रमन्ति। विशालाकाशे भ्रमन्तः असंख्य ज्योतिर्मण्डले अस्माकं बृहती पृथ्वी अपि अणुरिव विद्यते। अस्याः सञ्चालनं विलक्षणं गुप्तशक्तिरेवचास्याः सञ्चालनमपि करोति। तादृशशक्तिरेव ईश्वरः इति कथयते। सोऽपि सर्वव्यापीति सर्वे अङ्गीकुर्वन्ति।

**अणोरीयान्महतोमहीयानात्मास्य जन्तोर्निहितो गुहायाम्।**
**तमक्रतुः पश्यति वीतशोकोधातुः प्रसादान्महिमानमात्मनः॥ कठोपनिषद् 1.2.20**

तदेव अणुमात्रविद्यमानजीवात् प्रज्ञावन्मनुष्यपर्यन्तं समस्तप्राणिनां प्रकृतिद्वारा विकासमपि करोति। तरुः, लता, वनस्पतिः, कीटः, पतङ्गः, पक्षी, पशु मनुष्यश्च सर्वे समवेताः प्राणि परिवारेषु गण्यन्ते। सर्वे एकस्यैव वायोः उपयोगं कुर्वन्ति, एकस्यामेव पृथिव्यां भ्रमन्ति तथा पृथ्वीगृहात् यत् प्राप्यते तेनैव जीवन्ति च। सृष्टिमध्ये सर्वेषां कृते आकाशं पृथ्वीएकमेव प्रदत्तं, तेन ऐक्यभावनायाः जागरणमपि कृतम। ईश्वरसृष्टिमध्ये हृदयमपि एकमेवदत्तम्, कारणं तावत् अन्येषां साकं सङ्गे भाव्यमिति। सोऽहं भावनायाः जागरणमपि कृतम्। आध्यात्मिकज्ञानेन, चिन्तनेन अहंग्रस्त भावनायाः उन्मूलनार्थं सद्वृत्तीनां च पोषणार्थमपि अकरोति।

वैदिकाकालादेव सर्वे समाजकल्याणाय कृतसङ्कल्पिता: आसन् सन्ति च। समाजमिति/समाजशास्त्रमिति अर्वाचीना यद्यपि कथयन्ति अथाऽपि समाजेतरविषयेसृष्टिकालादेव चिन्तनं नासीत्। ग्रीक् लेटिन् भाषाया: socius logosइति शब्दद्वयमाश्रित्य समाजशास्त्रमिति व्यवहारार्थं (समाजम्) अकथयत् अगस्तकाम्टेमहोदय:। तत्राऽपि सामाजिकव्यवस्थाप्रगतिविषये यत्भवति तस्यैव समाजशास्त्रमिति व्यवहारे विद्यते। समाजशास्त्रन्तुसामूहिक प्रतिनिधित्वस्य ज्ञानमेव इति सर्वे अनुभवन्ति।

**वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।**

**तस्मिन्नदं सं च वि चैति सर्वम् सऽ ओत: प्रोतश्च विभू: प्रजासु।।**

**शुक्लयजुर्वेदसंहिता - अध्याय: 32 - मन्त्र: 8**

इति भारतीयानांविचारा: समाजशास्त्रदृष्ट्याअवलोकयामश्चेत्विश्वकल्याणमेवअवशिष्यते। यत्र सामाजिकक्रिया: भवन्ति तस्य निर्वचनात्मकदृष्ट्या समाजकल्याणाय व्यवहारा: भवन्ति एव। समाजे वादानाम् अनुभवोऽपि आसीत्। सृष्टिकालादेवआदर्श–यथार्थ–प्रकृति–प्रयोजनादिवादा: व्यवहारे आसन्। सन्दर्भानुगुणं क्रमश: सामाजिकस्तरीकरणकारणात् वादानां मध्येऽपि प्रभाव: अधिकतया अनुभूता:। मध्ये–मध्ये समाजे वास्तविकताया: संरक्षणमिति। समाजस्य संरक्षणविचारे आध्यामिकचिन्तनमपि प्रमुखमासीत्। समुदाये सामूहिकचेतनाया: विचार: अभवत्। निकटसामाजिक सम्बन्धानां, श्रमविभाजने सामाजिक (सम्बन्धस्य) भावनाया: विकास: जात:। चेतनाया: अभिव्यक्ति: सामूहिकप्रतिनिधित्वम् चेत्यादिन:आध्यात्मिकचिन्तनस्य सूक्ष्मरूपं अवगच्छाम: / समाजशास्त्री इमेल् दुर्खीमहोदय:मनुष्यानां माध्यमेन निर्णायकत्वस्य तथा सर्वाधिकशक्तीनां चाभिव्यक्तीकरणं भवतीति वदति। अस्माकं ऋषीणां, मुनीनां वचनमपि अद्यापि अनुसरणं क्रियते। उपनिषदा सर्वाधिकसत्यानां प्रतिपादनं कृतम्। सामाजिकास्तित्त्वस्य प्रतिपादने, सामूहिकचेतनाया: उन्नयने, समाजे व्यक्तित्वसम्बन्धस्य अभिव्यक्तीकरणे, व्यवहारस्य, विचाराणाञ्च (स्य) अनुभवानाञ्च (स्य) जीवनम् अवलोकयितुं शक्यते।

शिक्षासामाजिकवस्तुरूपेण अद्यापि गण्यते। भारतदेशे विभिन्नशिक्षा समाजशास्त्राधारिता: आसन् विद्यन्ते च। 64 कलाया: आधारेण अवगम्यते। यावत् शिक्षा समाजाश्रिता न भवति तावत् मौलिकत्वमपि न भवति।

शिक्षाजीवनस्य आधार: आवश्यकता चविद्यते। सम्प्रेषणेन समाजे हस्तान्तरं कृतम्।ऋषय:, मनुष्यश्च प्रश्नोत्तररीत्या सम्प्रेषणेनेन सत्यज्ञानस्य आध्यात्मिकरीत्या समाजे सर्वेषाम् उपकृतवन्त:। जान्ड्यूवी (John Dewey) (My Pedagogic creed) इत्याख्ये ग्रन्थेविद्यालयं सामाजिकसंस्थारूपेण स्वीकरोति। भारते गुरुकुलानि सर्वाण्यपि सामाजिकसंस्थारूपेण व्यवस्थापितानि (The school and society) इत्यस्मिन् ग्रन्थे अध्यापनं सरलतया सशक्तभाषाया चकरणीयम्, अथचसामाजिकपक्षाधारितमपि भवेदिति अभिप्रैति।

विद्यालयेन समुदायेन सम्बन्धितसामाजिकसंस्थारूपेण कार्यं कर्तव्यमिति तस्य आशय:। भारते आप्रारम्भात् एव उपर्युक्ता आशया व्यवहारे आसन् कथिताशया: व्यवहारे आसीत्। पितिरिम् ए सारोकिन् Pritirim A. Sorokin समाजशास्त्रिण: सामाजिकस्तरीकरणे सामाजिकगतिशीलविषये चापि प्रसिद्धा: आसन्।

समाजे गतिशीलत्वकारणेन सामाजिकोन्नति: अभवदिति विषये सन्देहलेशोऽपि नास्ति। एवमेव अगस्त काम्टे, कार्ल् मार्स्क, हरबट्र्स्पेन्सर, इमैल् डरकिम्, जार्ज सिम्मल, मेक्स् वेबर, वेब्लिन्, चार्लस् हार्टोन् कूलेचेत्यादयो विभिन्नसामाजिकसन्दर्भिताध्ययने विभिन्नवादानां व्यावहारिकपक्षे उपयुक्ता:। आदर्शवादस्य, यथार्थवादस्य, प्रयोजनवादस्य एवमन्यवादानां मध्ये–मध्ये समाजहितायप्रयुक्ता:। अत्रत्या: भारतीया: ऋषय: मुनय: वा समाजार्थमेव विभिन्नसन्दर्भे, विभिन्न वादानामाधारेण स्वीयव्यवहारेण सामाजिकगतिशीलताविषये चिन्तितं व्यवहारं च कृतवन्त:।

भारतीयसंस्कृते:नैसर्गिकप्रकृते: आधारेण सामान्य धारणा: विद्यते यत् भारतीयसंस्कृति: मूलत: अध्यात्मवादिनी भवति। अस्मिन् स्वानुभूत्यात्मसाक्षात्कारमाध्यमेन इन्द्रियातीतज्ञानप्राप्तिविषये बलं दत्तम्। इतिहास:- पुराणं च - सर्वमपि समाजाश्रितमस्ति, आध्यात्मिकचिन्तनेन समाजोन्नत्यर्थम् उपकृता:। विकसितवैज्ञानिकुयगे यन्त्राणामाधारेण वास्तविकस्थितिम् अवगच्छन्ति। चिकित्साक्षेत्रे CT scan, MRI, Xray, Ultrasound, PET Scan, चेत्यदि: अनुप्रयोगिताम् अनुभवाम:। श्रीमद्भागवते आचार्य: कपिल: देवहूत्ये सम्बोधनसन्दर्भे शिशो: गर्भावस्थायां क्रमश: प्रगतिविषये आह।

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये ।
स्त्रिया: प्रविष्ट उदरं पुंसो रेत:कणाश्रय: ।।[1]
कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्कन्धू: पेश्यण्डं वा तत: परम् ।।[2]
मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रह: ।
नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभि: ।।[3]
चतुर्भिर्धातव: सप्त पञ्चभि: क्षुत्तृडुद्भव: ।
षड्भिर्जरायुणा वीत: कुक्षौ भ्राम्यति दक्षिणे ।।[4]
मातुर्जग्धान्नपानाद्यैरेधद्धातुरसम्मते।
शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसम्भवे ।।[5]
कृमिभि: क्षतसर्वाङ्ग: सौकुमार्यात्प्रतिक्षणम् ।
मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यै: क्षुधितैर्मुहु:।।[6]
कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणै: ।
मातृभुक्तैरुपस्पृष्ट: सर्वाङ्गोत्थितवेदन:।।[7]
उल्बेन संवृतस्तस्मिन्नन्त्रैश्च बहिरावृत: ।
आस्ते कृत्वा शिर: कुक्षौ भुग्नपृष्ठशिरोधर:।। [8]
अकल्प: स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे ।
तत्र लब्धस्मृतिर्दैवात्कुर्मे जन्मशतोद्भवम् ।
स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते ।। [9]

श्रीमद्भागवतमहापुराणम् -तृतीयस्कन्धे - अध्याय:- 31

मातृगर्भे शिशो: अवस्था, प्रगतिविषये आधुनिकवैज्ञानिककयन्त्राणामभावकाले इदम् इत्थम् इति वर्णितम्।जन्तूनां, मानवानां शरीररचना (Anatomy) विषये ते जानन्ति स्म। प्रत्येकस्मिन् क्षेत्रे नैपुण्यं प्रदर्शितवन्त:। तत्र मूलकारणमासीत् आध्यात्मिकचिन्तनेन समाजसेवायाम् आत्मसमर्पणमेव। उपनिषदि, पुराणेषु इतिहासेष्वपि समाजहितचिन्तनम् आध्यात्मिकं धार्मिकंचिन्तनाधारितमेव आसीत्।

भारतीयसंस्कृति: मोक्षाधारित: इति विषये सन्देह एव नास्ति। भारतीया अवश्यमेव आध्यात्मिका: एवं भौतिकजगति जीवनयापनेन आध्यात्मिकचिन्तनेन मोक्षार्थं प्रयत्नशीला: सन्ति। तेषां विश्वासस्तु अर्थविमुखतायां नास्ति परन्तु अर्थोन्मुखताया: साकं परमार्थप्राप्त्यर्थं मोहरहितजीवनेन धार्मिकचिन्तनेन भौतिकजगत्यपि आध्यात्मिकभावनयासाकं व्यवहरन्ति। उपनिषदादि दर्शनाध्ययनेन स्पष्टीयते यत् श्रेय: प्रेयमार्गप्रदर्शनेन मार्गद्वयस्याऽपि तिरस्कार: न कृत:। दर्शनादि

ज्ञानेन अवगम्यते यत् भौतिकजीवनमपि आध्यात्मिकजीवनात् न्यूनं नास्तीति।बृहदारण्यकोपषदि याज्ञवल्क्यमहर्षि:जलस्य मूलतत्त्वरूपेण स्मृत्वा ततः सत् इत्यस्य उत्पत्तिरिति तदेव ब्रह्म इति घोषयन्ति।

आप एवेदमग्र आसुरता आपः सत्यमसृजन्त सत्यं ब्रह्म प्रजापतिं प्रजापतिर्देवास्ते देवाः सत्यमेवोपासते तदेतत् त्र्यक्षर सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीत सत्यभूयमेव भवति नैवं विद्वा समनृत हिनास्ति ।। 1।।

छान्दोग्योपनिषदि

**तौ वा एतौ द्वौ संवर्गौ वायुदेव देवेषु प्राणः प्राणेषु।।**

वायुः श्रृष्टेः मूलतत्त्वमिति स्वीकृत्य तस्य स्थूलं सूक्ष्मं वा रूपमिति वर्णितम् स्थूलवायुरित्यस्य भौतिकजगति वायुरूपेण सूक्ष्मवायुप्राणरूपेणेति वर्णितम्। समाजे भारतस्य पारम्परिकमानसिकचिन्तनस्य ग्रहणेन साकं कौटिल्यः, वात्स्यायनः, आर्यभट्टः, वराहमिहिरः, चरकः, सश्रुतश्चेत्यादिना जनानां मार्गप्रशस्तकार्यं कृतम्। तेषां कृतिषुभारतीयसंस्कृतेः गभीराध्यात्मिकतायाः भारतभूमिमध्ये संस्थापने प्रसिद्धिरभवत्।

आध्यात्मिकचेतनायाः कारणेन सुसंस्कारस्य प्राप्तिः सामाजिकजीवने एकतायाश्च प्रभावः जायते। प्रत्येकस्मिन् मनुष्ये विद्यमानभगवत्तत्त्वस्य अवगमनम् एवं सर्वे सर्वेषां कृते इति भावनायाः जागरणं भवति। आध्यात्मिकसमाजवादः आत्मचैतन्यस्य (हृदयान्ते) मानवजातेः समष्टिजीवनमेव। तदेव परमकल्याणमय जीवनं भवति।

**सन्दर्भग्रन्थाः -**


1. छान्दोग्योपनिषद् – गीताप्रेस, गोरखपुर ।
2. बृहदारण्यकोपनिषद् – गीताप्रेस, गोरखपुर ।
3. उपनिषत्संग्रहः – मोतीलाल बनारसीदास–दिल्ली–110007
4. शुक्लयजुर्वदसंहिता – व्याख्याकारः डा. रामकृष्णशास्त्री– चौखम्बा विद्याभवन – वाराणसी।
5. श्रीमद्भागवतमहापुराणम् – गीताप्रेस, गोरखपुर
6. कल्याणहिन्दू संस्कृति अंक –गीताप्रेस– गोरखपुर
7. प्राचीन भारतीय इतिहास संस्कृति एवं समाज अतुल कुमार सिन्हा – संदर्भ प्रकाशन – दिल्ली–110085
8. Master of Sociological Thought – Lewis. A. Coser Rawat Publications – Jaipur &NewDelhi.
9. शिक्षा के सिद्धान्त – पाठक एवं त्यागी – विनोद पुस्तक मन्दिर, आगरा